Agastya Gurukulam

एकात्मता स्तोत्रम्
Ekatmata Stotram

ॐ सच्चिदानन्दरूपाय नमोऽस्तु परमात्मने
ज्योतिर्मयस्वरूपाय विश्वमाङ्गल्यमूर्तये ॥१॥

om saccidanandarupaya namostu paramatmane
jyotirmayasvarupaya vishvamangalyamurtaye (1)

प्रकृतिः पञ्चभूतानि ग्रहलोकस्वरास्तथा
दिशः कालश्च सर्वेषां सदा कुर्वन्तु मङ्गलम्॥२॥

prakritih pancabhutani graha loka svarastatha
dishah kalashca sarvesham sada kurvantu mangalam (2)

रत्नाकराधौतपदां हिमालयकिरीटिनीम्
ब्रह्मराजर्षिरत्नाढ्यां वन्दे भारतमातरम् ॥३॥

ratnakaradhautapadam himalayakiritinim
brahmarajarsiratnadhyam vande bharatamataram (3)

महेन्द्रो मलयः सह्यो देवतात्मा हिमालयः
ध्येयो रैवतको विन्ध्यो गिरिश्चारावलिस्तथा ॥४॥

mahendro malayah sahyo devatatma himalayah
dhyeyo raivatako vindhyo girishcaravalistatha (4)

गङ्गा सरस्वती सिन्धु ब्रह्मपुत्राश्च गण्डकी
कावेरी यमुना रेवा कृष्णा गोदा महानदी ॥५॥

ganga sarasvati sindhurbrahmaputrashca gandaki
kaveri yamuna reva krsna goda Mahanadi (5)

अयोध्या मथुरा माया काशी काञ्ची अवन्तिका
वैशाली द्वारका ध्येया पुरी तक्षशिला गया ॥६॥

ayodhya mathura maya kashi kanci avantika
vaishali dvarika dhyeya puri takshashila gaya (6)

प्रयागः पाटलीपुत्रं विजयानगरं महत्
इन्द्रप्रस्थं सोमनाथस्तथामृतसरः प्रियम्॥७॥

prayagah pataliputram vijayanagaram mahat
indraprastham somanathah tathaamrtasarah priyam (7)

चतुर्वेदाः पुराणानि सर्वोपनिषदस्तथा
रामायणं भारतं च गीता षड्दर्शनानि च ॥८॥

caturvedah puranani sarvopanishadastatha
ramayanam bharatam ca gita saddarshanani ca (8)

जैनागमास्त्रिपिटकः गुरुग्रन्थः सतां गिरः
एष ज्ञाननिधिः श्रेष्ठः श्रद्धेयो हृदि सर्वदा॥९॥

jainagamastripitaka gurugranthah satam girah
esha jnananidhih shresthah shraddheyo hrdi sarvada 9)

अरुन्धत्यनसूया च सावित्री जानकी सती
द्रौपदी कन्नगी गार्गी मीरा दुर्गावती तथा ॥१०॥

arundhatyanasuya ca savitri janaki sati
draupadi kannagi gargi mira durgawati tatha (10)

लक्ष्मी-अहल्या चन्नम्मा रुद्रमाम्बा सुविक्रमा
निवेदिता शारदा च प्रणम्य मातृदेवताः ॥११॥

laksmirahalya cannamma rudramamba suvikrama
nivedita sarada ca pranamya matrdevatah (11)

श्रीरामो भरतः कृष्णो भीष्मो धर्मस्तथार्जुनः
मार्कण्डेयो हरिश्चन्द्रो प्रह्लादो नारदो ध्रुवः ॥१२॥

sri ramo bharatah krisno bhishmo dharmastatharjunah
markandeyo harishcandrah prahlado narado dhruvah (12)

हनुमान् जनको व्यासो वसिष्ठश्च शुको बलिः
दधीचि विश्वकर्माणौ पृथु वाल्मीकि भार्गवः ॥१३॥

hanumanjanako vyaso vasisthashca shuko balih
dadhicivishvakarmanau prthuvalmikibhargavah (13)

भगीरथश्चैकलव्यो मनुर्धन्वन्तरिस्तथा
शिबिश्च रन्तिदेवश्च पुराणोद्गीतकीर्तयः ॥१४॥

bhagirathashcaikalavyo manurdhanvantaristatha
shibishca rantidevashca puranodgitakirtayah (14)

बुद्धजिनेन्द्रगोरक्षाः पाणिनिश्च पतञ्जलिः
शङ्करो मध्वनिम्बार्कौ श्रीरामानुजवल्लभौ ॥१५॥

buddha jinendra gorakshah paninishca patanjalih
shankaro madhvanimbarkau sri ramanujavallabhau (15)

झूलेलालोथ चैतन्यः तिरुवल्लुवरस्तथा
नायन्मारालवाराश्च कम्बश्च बसवेश्वरः ॥१६॥

jhulelaloata caitanyah tiruvalluvarastatha
nayanmaralavarashca kambashca basavesvarah (16)

देवलो रविदासश्च कबीरो गुरुनानकः
नरसी तुलसीदासो दशमेषो दृढव्रतः ॥१७॥

devalo ravidasashca kabiro gurunanakah
narasistulasidaso dashamesho drdhavratah (17)

श्रीमत् शङ्करदेवश्च बन्धू सायणमाधवौ
ज्ञानेश्वरस्तुकारामो रामदासः पुरन्दरः ॥१८॥

srimat sankaradevashca bandhu sayanamadhavau
jnaneshvarastukaramo ramadasah purandarah (18)

बिरसा सहजानन्दो रामानन्दस्तथा महान्
वितरन्तु सदैवैते दैवीं सद्गुणसंपदम् ॥१९॥

birasa sahajanando ramanadastatha mahan
vitarantu sadaivaite daivim sadgunasampadam (19)

भरतर्षिः कालिदासः श्रीभोजो जकणस्तथा
सूरदासस्त्यागराजो रसखानश्च सत्कविः ॥२०॥

bharatarshih kalidasah sribhojo jakanastatha
suradasastyagarajo rasakhanashca satkavih (20)

रविवर्मा भातखण्डे भाग्यचन्द्रः स भूपतिः
कलावंतश्च विख्याताः स्मरणीया निरन्तरम्॥२१॥

ravivarma bhatakhande bhagyacandrah sa bhupatih
kalavantashca vikhyatah smaraniya nirantaram (21)

अगस्त्यः कम्बुकौण्डिन्यौ राजेन्द्रश्चोलवम्शजः
अशोकः पुष्यमित्रश्च खारवेलः सुनीतिमान् ॥२२॥

agastyah kambukaundinyau rajendrashcolavamshajah
ashokah pushyamitrashca kharavelah sunitiman (22)

चाणक्यचन्द्रगुप्तौ च विक्रमः शालिवाहनः
समुद्रगुप्तः श्रीहर्षः शैलेन्द्रो बप्परावलः ॥२३॥

canakyacandraguptau ca vikramah shalivahanah
samudraguptah sriharshah shailendro bapparavalah (23)

लाचिद्भास्करवर्मा च यशोधर्मा च हूणजित्
श्रीकृष्णदेवरायश्च ललितादित्य उद्बलः ॥२४॥

lacid bhaskaravarma ca yashodharma ca hunajit
sri krisnadevarayashca lalitaditya udbalah (24)

मुसुनूरिनायकौ तौ प्रतापः शिव भूपतिः
रणजितसिम्ह इत्येते वीरा विख्यात विक्रमाः ॥२५॥

musunoorinayakau tau pratapah shivabhupatih
ranajitsimha ityete vira vikhyatavikramah (25)

वैज्ञानिकाश्च कपिलः कणादः शुश्रुतस्तथा
चरको भास्कराचार्यो वराहमिहिरः सुधीः ॥२६॥

vaijnanikashca kapilah kanadah sushrutastatha
carako bhaskaracaryo varahamihirah sudhih (26)

नागार्जुनो भरद्वाजो - आर्यभट्टो वसुर्बुधः
ध्येयो वेन्कटरामश्च विज्ञा रामानुजायः ॥२७॥

nagarjuno bharadvaja aryabhatto basurbudhah
dhyeyo venkataramashca vijna ramanujadayah (27)

रामकृष्णो दयानन्दो रवीन्द्रो राममोहनः
रामतीर्थोऽरविन्दश्च विवेकानन्द उद्यशः ॥२८॥

ramakrishno dayanando ravindro ramamohanah
ramatirthorvindashca vivekananda udyashah (28)

दादाभाई गोपबंधुः तिलको गान्धीराद्दताः
रमणो मालवीयश्च श्री सुब्रमण्यभारती ॥२९॥

dadabhai gopabandhuh tilako gandhiradrtah
ramano malaviyashca srisubrahmanya bharati (29)

सुभाषः प्रणवानन्दः क्रान्तिवीरो विनायकः
ठक्करो भीमरावश्च फुले नारायणो गुरुः ॥३०॥

subhashah pranavanandah krantiviro vinayakah
thakkaro bhimaravashca phule narayano guruh (30)

सङ्घशक्तिप्रणेतारौ केशवो माधवस्तथा
स्मरणीय सदैवैते नवचैतन्यदायकाः ॥३१॥

sanghashakti –pranetarau keshavomadhavastatha
smaraniya sadaivaite navacaitanyadayakah (31)

अनुक्ता ये भक्ताः प्रभुचरणसंसक्तहृदयाः
अविज्ञाता वीरा अधिसमरमुद्ध्वस्तरिपवः ।
समाजोद्धर्तारः सुहितकरविज्ञाननिपुणाः
नमस्तेभ्यो भूयात्सकलसुजनेभ्यः प्रतिदिनम् ॥ ३२॥

anukta ye bhaktah prabhucaranasamsaktahrdayah
anirdishta vira adhisamaramuddhvastaripavah
samajoddhartarah suhitakaravijnananipunah
namastebhyo bhuyat sakalasujanebhyah pratidinam (32)

इदमेकात्मता स्तोत्रं श्रद्धया यः सदा पठेत्
स राष्ट्रधर्मनिष्ठावानखण्डं भारतं स्मरेत् ॥३३॥

idamekatmata stotram shraddhaya yah sada pathet
sa rastradharmanishthavan akhandam bharatam smaret (33)

Bharatmata ki jay